वटुककवच

नं० ~~११८~~ ११०

(वटुककवचप्रारम्भः)

ॐश्रीगणेशायनमः श्रीदेव्युवाच भगवन्सर्ववेत्तात्वं-
१ देवानांप्रीतिकारकं भैरवंकवचंब्रूहियदिवास्तिकृपामयि १
प्राणत्यागंकरिष्यामियदिनोकथयिष्यसि सत्यंसत्यंपुनः
सत्यंसत्यमेवनसंशयः २ एवंदेव्यावचःश्रुत्वावृहस्पतिस-
मप्रभूः उवाचवचनंतत्रदेवदेवोमहेश्वरः ३ रुद्रउवाच।
वाटुकंकवचंदिव्यंशृणुमत्प्राणवल्लभे चंडिकातंत्रसर्वस्वं-
वटुकस्यविशेषतः ४ तत्रमंत्राक्षरंचैववासुदेवस्वरूपकं।
शुक्लवर्णोद्विबाहुश्चवटुकश्चंद्रशेखरः ५ आपदुद्धारणोना
मभैरवःपरिकीर्तितः प्रवक्ष्यामिसमासेनचतुर्वर्गस्यसिद्धः

ये ६ प्रणवंकामदंविद्याल्लज्जाबीजस्वसिद्धिदं बटुकायेति विजयंमहापातकनाशनं ७ आपदुद्धारणायेतिह्यापदुद्धारकंन्नृणां कुरुद्वयंमहेशानिमोहनंपरिकीर्तितं ८ वटुकायमहेशानिस्तंभनंपरिकीर्त्तितं लज्जावीजंतथाविद्यान्मुक्तिदं परिकीर्तितं ९ द्वाविंशत्यक्षरोमंत्रः क्रमेणजगदीश्वरी सर्वकामप्रदःप्रोक्तः सर्व सिद्धिप्रदायकः १० ॐअस्यश्रीवटुकभैरवकवचस्य भैरवऋषिरनुष्टुप्छंदः श्रीवटुकभैरवोदेवता ममनोरथावाप्तिसिद्ध्यर्थेजपेविनियोगः ॐपातुशिरसिनित्यंह्रींपातुकंठदेशके वटुकायपातुहृदयेआपदुद्धारण

यच ॥ कुरुद्वयंलिङ्गमूलेअधारेवटुकायच सर्वदापातु
२ ह्रींबीजंवाह्वोयुगलमेवच षडङ्गसहितोदेवोनित्यंरक्षतुभै
रव ॐह्रींवटुकायपातुसततंसर्वाङ्गंममसर्वदा ॥२॥ ह्रींका
लायपादयोपातु---वीरासनंहृदि ॐह्रींमहाकालीशिरः
पातुकंठदेशेतुभैरवः ॥४॥ दंडपाणिर्गुह्यमूलेभैरवीसहित
स्ततः ह्रींललितभैरवःपातुअष्टभिःशक्तिभिसह ॐह्रींवि
श्वनाथःसदापातुसर्वाङ्गंममसर्वदा ॐह्रींअन्नपूर्णासदापा
तुअंशोरक्षतुचंडिका ॥६॥ असितांगःशिरःपातुललाटेरुरुभै
रवः श्रीचंडभैरवःपातुवक्त्रेकंठेश्रीक्रोधभैरवः ॥७॥ उन्मत्त

भैरवः पातु हृदये मम सर्वतः नाभिदेशे कपाली च लिङ्गे भीषण
भैरवः १८ मूलाधारे च संहारः बाहुयुग्मं च भैरवः हंसबीजं पा
तु हृदि सोहं रक्षतु प्राणयोः १९ प्राणापानं समानं च उदानं व्या
नमेव च रक्षतु द्वारमूले च दशदिक्षु समंततः २० प्रणवं पातु
सर्वाङ्गे लज्जाबीजं महाभये इति श्रीभैरवकवचं भैरवस्य प्रकी
र्तितं चतुर्वर्गप्रदं नित्यं स्वयं देव प्रकाशितं यः पठेच्छृणुयाद्देवि
धारयेत् कवचोत्तमं २२ सदानंदमयो भूत्वा लभते परमं पदं य
श्चैनं चिंतयेद्देवि कवचं मन्मुखोदितं २३ कोटि तन्मार्जितं पापं
नश्यते वन संशयः जलमध्ये ग्निमध्ये च दुर्ग्रहे शत्रुसंकटे २४

व॰ कवचस्मरणादेवसर्वत्रविजयीभवेत् भक्तियुक्तेनमनसा
क॰ कवचंपूजयेद्यदि २५ कामतुल्यश्चनारीणांरिपूणांचयमोप
२ मः तस्यपादांबुजद्वंद्वंराज्ञांकिरीटभूषणं २६ तस्यभूर्तिवि
3 लोकैर्वकुवेरोपितिरस्कृतः अस्यविज्ञानमात्रेणमंत्रसिद्धि
र्नसंशयः २७ इदंकवचमज्ञात्वायोजपेद्वटुकंनरः सना
प्नोतिफलंतस्यपरेचनरकंव्रजेत् २८ मन्वंतरत्रयंस्थित्वा-
तिर्यक्योनिषुजायते इहलोकेमहारोगीदारिद्र्येणप्रपीडि
तः २९ शत्रूणांवशगोभूत्वाकरपत्रिभवेज्जडः देयंपुत्राय
शिष्यायशांतायप्रियवादिने ३० कारपण्यरहितायालंवटु

कोभक्तिरतायच योपरीत्तप्रदातायै तस्यनश्यतिसत्वरम् २१
आयुर्वृद्धिर्यशोधर्मं वलंचैवनसंशयः तस्माद्भक्तायदातव्यं
मयै — कथितंपुरा २२ इतिचण्डिकातन्त्रेवटुककवचंसमाप्तं॥

वं कं ध

